Gyanshauryam, International Scientific Refereed Research Journal
© 2021 GISRRJ | Volume 4 | Issue 6 | ISSN : 2582-0095

# संस्कृतसाहित्ये रथविमर्शः

**Nayan Bala Das**
Assistant Professor, Department of Sanskrit, Balurghat Mahila Mahavidyalaya, West Bengal, India

**Article Info**
Volume 4 Issue 6
Page Number: 63-68

**Publication Issue :**
November-December-2021

**Article History**
Accepted : 01 Dec 2021
Published : 25 Dec 2021

**सारांशः** – सम्प्रति समाजे गमनागमनस्य माध्यमरूपेण विविधक्षेत्रे नानाविधानां आधुनिक-यानानां प्रयोगः परिदृश्यते। तथैव प्राचीनकालेऽपि गमनागमनाय विविधयानानां प्रचलनमासीत्। विशालेऽस्मिन् संस्कृतसाहित्ये अर्थात् वेदे, इतिहासे, पुराणे, काव्ये नाटके चेत्यादिषु गमनागमनस्य माध्यमरूपेण गजः, तुरगः, रथः, प्रवहणं, डयनं, शकटः, अनः, कम्बलिवाह्यकं, गन्त्री, दोला, प्रेङ्खा, द्वैपः, वैयाघ्रः, शिविका, याप्ययानं, पाण्डुकम्बली, काम्बलः, वास्त्रः इत्यादीनां व्यवहारः भवति स्म। एतेषु **रथः** सुप्रसिद्धैकः माध्यमो आसीत्। देवताः राजानश्च न केवलं गमनागमनार्थं युद्धार्थं च, अपितु क्रीडनार्थं, भ्रमणार्थं रमणार्थं च रथस्य प्रयोगं कृतवन्तः। अन्यत्र बहुत्रापि रथस्य प्रयोगः दृश्यते। विविधप्रसङ्गे रथस्य प्रयोगः वेदेषु, कोशग्रन्थेषु, काव्येषु, शिल्पसाहित्येषु, उत्सवादिषु च परिलक्ष्यते। रथशव्दः उपमारूपेण कुत्रचित् शरीररूपेण जगद्रूपेण च व्यवहृयते। लौकिकसंस्कृतसाहित्ये विविधप्रसङ्गे बहुषु स्थलेषु रथस्य चर्चा परिदृश्यते। तन्मद्धे अन्यतमोऽस्ति रथस्य गतिवर्णना। भासकालिदासाभ्यामारभ्य परवर्तिसमये प्रायः सर्वेऽपि संस्कृतकवयः नाट्यकाराश्च तेषां काव्येषु नाटकेषु च प्रथारूपेण एव रथस्य वर्णनां कृतवन्तः। अनेन ज्ञायते यत् संस्कृतसाहित्ये रथशब्दस्य महत्त्वपूर्णस्थानमासीत्।

**मूलविन्दवः** – रथः, वेदेषु रथः, कोशग्रन्थेषु रथः, काव्येषु रथः, शिल्पशास्त्रेषु रथः, उत्सवादिषु रथः।

अपारे संस्कृतवाङ्मयेऽस्मिन् प्रायशः सर्वासां विद्यानां विवधितया वर्णनं दृश्यते। नहि तादृशः लौककिः वा अलौककिो विषयोऽस्ति यः संस्कृतवाङ्मये नोपलभ्यते। निखिलमपि संस्कृतवाङ्मयं वैदकिवाङ्मयं लौककिवाङ्मयं चेति भेदात् द्विधा वभिक्तम्। वैदकिवाङ्मये चत्वारो वेदाः,उपवेदाः,षड्वेदाङ्गाणि,उपनिषदश्च वर्तन्ते। लौककिवाङ्मये पुराणानि, इतिहासाः, स्मृतयः, दर्शनानि च सन्ति। न केवलं एतदेव शास्त्राणि अपितु व्याकरणशास्त्रं, काव्यशास्त्रं, गणितिशास्त्रं, ज्योतिषशास्त्रं, धर्मशास्त्रं, छन्दशास्त्रं, कोशग्रन्थाश्च संस्कृतवाङ्मयस्य गौरवमभिवर्धयति।

विशालेऽस्मिन् संस्कृतवाङ्मये अर्थात् वेदे, इतिहासे, पुराणे, काव्ये नाटके चेत्यादिषु गमनागमनस्य माध्यमरूपेण गजः, तुरगः, रथः, प्रवहणं, डयनं, शकटः, अनः, कम्बलिवाह्यकं, गन्त्री, दोला, प्रेङ्खा, द्वैपः, वैयाघ्रः, शिविका, याप्ययानं, पाण्डुकम्बली, काम्बलः, वास्त्रः इत्यादयः ये प्रसिद्धाः सन्ति तेषु **रथः** एकः सुप्रसिद्धमाध्यमोऽस्ति।

**Copyright: ©** the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

देवताः राजानश्च न केवलं गमनागमनार्थं युद्धार्थं च, अपितु क्रीडनार्थं, भ्रमणार्थं रमणार्थं च रथस्य प्रयोगं कृतवन्तः इति परिलक्ष्यते। अन्यत्र बहूत्रापि रथस्य प्रयोगः दृश्यते। अतः **"संस्कृतवाङ्मये रथविमर्शः"** इति शीर्षकम् आधारीकृत्य शोधपत्रमिदं मया लिखितम्।

रमते यस्मिन् येन वा स रथः। रमु क्रीडायाम् – इत्यत्र रथः शब्दः रम् धातुना क्यन् प्रत्ययेन निष्पन्नो भवति। यस्यार्थो भवति – यानं, शरीरं, पादो, वेतसो वा।

वेदेषु बहुषु सूक्तेषु रथस्य वर्णना परिदृश्यते। तद्यथा – उषस्सूक्तम्, सूर्यसूक्तम्, सवितृसूक्तम्, शिवसंकल्पसूक्तम्, रुद्रसूक्तम्, इन्द्रसूक्तम्, वरुणसूक्तम्, पर्जन्यसूक्तम् इत्यादयः। वैदिकदेवताः विविधप्रकारैः रथैः विचरन्ति स्म। यथा –

**उषो देव्यमर्त्या वि भाहि चन्द्ररथा सूनृता ईरयन्ती।**

**आ त्वा वहन्तु सुयमासो अश्वा हिरण्यवर्णां पृथुपाजसो ये।।**

(ऋग्वेदः – 3.61.2)

अर्थात् उषादेवी अरुणवर्णेन तथा हिरण्यवर्णेन अश्वेन सुवर्णरथे अर्थात् चन्द्ररथे आरुह्य सूर्यकिरणेन अतिशयशोभायमानां भूत्वा द्युलोके परिभ्रमति इत्यर्थः। अनेन ज्ञायते यत् उषादेव्या तदानीं गमनागमनमाध्यमरूपेण रथस्य प्रयोगोऽपि कृतः।

रथस्य नाभिना मनसिस्थितशब्दस्य उपमेयोपमानरूपेण वर्णयित्वा शिवसंकल्पसूक्ते उक्तं यत् –

**यस्मिन्नृचः साम यजूंषि यस्मिन् प्रतिष्ठिता रथनाभाविवाराः।**

**यस्मिंश्चित्तं सर्वमोतं प्रजानां तन्मे मनः शिवसंकल्पमस्तु।।**

**सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजिन इव।**

**हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसंकल्पमस्तु।।**

(यजुर्वेदः वाजसनेयसंहिता – 34.5,6)

रथस्य चक्रे यथा नाभिः तिष्ठति, तथैव सर्वेषां प्राणिनां इन्द्रियाणां च ज्ञानयुक्ते मनसि ऋक्-साम-यजु-अथर्ववेदानाञ्च मन्त्राणि वर्तन्ते। येन उत्तमदक्षः सारथिः अश्वान् अभीषुना स्वेच्छानुसारेण चारयति, तथैव मनः मनुष्यान् सुनियन्त्रयित्वा कर्मणि नियुक्तं करोति।

कालसूक्ते कालं अश्वरूपेण विश्वञ्च रथरूपेण वर्णितमस्ति। अर्थात् कालरूपः अश्वः विश्वरूपं रथं वहति –

**कालो अश्वो वहति सप्तरश्मिः सहस्राक्षो अजरो भूरिरेताः।**

**तमा रोहन्ति कवयो विपश्चितस्तस्य चक्रा भुवनानि विश्वा।।**

(अथर्ववेदः – 19.53.1)

दशमुख्योपनिषत्सु अन्यतमाऽस्ति कठोपनिषद्। उपनिषद्यस्मिन् नचिकेतां प्रति यमोपदेशस्य शरीररथरूपकनिरूपणेन एकोन्नतदार्शनिकचिन्तनस्य उपस्थापना वर्तते –

**आत्मानं रथिनं विद्धि, शरीरं रथमेव तु।**

**बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च।।**

**इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्।**

**आत्मेन्द्रिय मनोयुक्तं भोक्तेत्याहुर्मनीषिणः।।**

(कठोपनिषद् - 1.3.3,4)

अर्थात् आत्मानं संसारिणं, रथस्वामिनं रथिनं जानीहि, शरीरं रथमेव तु, रथबद्धहयस्थानीयैः इन्द्रियैः आकृष्यमाणत्वात् शरीरस्य। अध्यवसायलक्षणां बुद्धिं तु सारथिं विद्धि, बुद्धिनेतृत्वप्रधानत्वात् शरीरस्य सारथिनेतृप्रधानः इव रथः। सर्वं हि देहगतं कार्यं बुद्धिकर्तव्यमेव प्रायेण। मनः संकल्पविकल्पादिलक्षणं रशनां विद्धि। मनसा हि प्रगृहीतानि श्रोत्रादीनि करणानि प्रवर्तन्ते रशनया इवाश्वाः। चक्षुरादीनि इद्रियाणि हयान् आहुः। तेष्वेव इन्द्रियेषु हयत्वेन परिकल्पितेषु गोचरान् मार्गान् रूपादीन् विषयान् विद्धि। आत्मेन्द्रियमनोयुक्तं शरीरेन्द्रियमनोभिः सहितं संयुक्तमात्मानं भोक्तेति।

यास्काचार्येणोक्तं यत् यतः राजा यज्ञसंयोगात् स्तुतिं लभते तस्मात् राजसंयोगात् युद्धोपकरणान्यपि स्तुतिभाञ्जि भवन्ति। युद्धोपकरणेषु रथ एव प्रथमागामी भवति अर्थात् युद्धोपकरणेषु रथ एव प्रधानः, मुख्योऽस्ति-

**"यज्ञसंयोगाद्राजा स्तुतिं लभेत। राजसंयोगाद् युद्धोपकरणानि। तेषां रथः प्रथमागामी भवति। रथो रंहतेर्गतिकर्मणः स्थिरतेर्वा स्याद्विपरीतस्य रममाणोऽस्मिंस्तिष्ठतीति वा। रपतेर्वा। तस्यैषा भवति।**

(निरुक्तम् - 9.11)

यास्काचार्यः रथशब्दस्य व्युत्पत्तिः तथा निगमः विविधप्रकारेण प्रस्तुतवान्। रथः कस्मात्? उच्यते गत्यर्थात् रंहतेः, अत्र रथः शब्दः 'रंह' धातुना क्थन् प्रत्ययेन निष्पन्नो भवति। अथवा विपरीतात् स्थिरतेः, अर्थात् स्थिरशब्दः विपरीतेन रथः शब्दः भवति। (स्थिर=थर=रथ) हस्ती-अपेक्षया अश्वापेक्षया वा रथे योद्धा स्थिरतया तिष्ठति। अथवा रथमाणः अस्मिन् तिष्ठति इति रथः, अर्थात् रथेऽस्मिन् मनुष्यः सुखेन उपविशति।

अमरकोशे रथशब्दस्य बहवः पर्यायवाचिशब्दाः सन्ति, ते यथा- शताङ्गः, स्यन्दनः, रथः, पुष्यरथः, कर्णीरथः प्रवहनम्, डयनं, अनः शकटः, गन्त्री, कम्बलिवाह्यकम्, शिविका, याप्ययानम्, दोला, प्रेङ्खा, द्वैवः, वैयाघ्रः, पाण्डुकम्बली, काम्बलः, बास्त्रः इत्यादयः।

**"याने चक्रिणि युद्धार्थे शताङ्गः स्यन्दनो रथः।**
**असौ पुष्यरथश्चक्रयानं न समराय यत्॥**
**कर्णीरथः प्रवहणं डयनञ्च च समं त्रयम्।**
**क्लीवेऽनः शकटोऽस्त्री स्यात्, गन्त्री कम्बलिवाह्यकम्॥**
**शिविका याप्ययानं स्यात्, दोला प्रेङ्खादिकाः स्त्रियाम्।**
**उभौ तु द्वैपवैयाघ्रौ द्वीपिचर्म्मावृते रथे॥**
**पाण्डुकम्बलसंवीतः स्यन्दनः पाण्डुकम्बली।**
**रथे काम्बलवाश्त्राद्याः कम्बलादिभिरावृते॥"**

(अमरकोशः 2.8. 51-54)

रामायणमेकं सुप्रसिद्धं महाकाव्यमस्ति। अत्र महारथस्य वर्णना प्राप्यते। रामायणे एकः प्रमुखः चरित्रोऽस्ति दशरथः, दशेषु दिक्षु गतिः इति दशरथः। तस्य रथस्य चत्वारः अथवा पञ्चाश्वाः सर्वेषु दिक्षु भ्रामयन्ति। रावणस्य पुत्रः अक्सकुमारस्य रथः अष्टाश्वाभिः वाह्यते। अन्यमेकं सुप्रसिद्धं महाकाव्यमस्ति महाभारतम्। कुरुक्षेत्रयुद्धे अर्जुनः, युधिष्ठिरः, भीष्मः, द्रोणाचार्यः, कर्णः एते सर्वे रथस्योपरि आरुह्य एव युद्धं कृतवन्तः। एतेषां रथानां भिन्न भिन्न नाम तथा युद्धे तेषां योगदानमपि भिन्नभिन्नमासीत्।

महाभारते कुरूक्षेत्रयुद्धे रथः युद्धार्थे प्रयुज्यते। भारतीयदर्शने रथः साक्षीरूपेण प्रतिभाति। यथा श्रीमद्भगवद्गीतायां अर्जुनः श्रीकृष्णं प्रति वाक्यमिदमाह –

**“सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत।।”**

(गीता – 1.21)

लौकिकसंस्कृतसाहित्ये विविधप्रसङ्गे बहुषु स्थलेषु रथस्य चर्चा परिदृश्यते। प्राक् कालिदाससमये नाट्यकारः भासः भ्रमणरतभरतस्य रथस्य गतेः वर्णनां कृतवान् –

भरतः – (रथवेगं निरुप्य) अहो तु खलु रथवेगः। एते ते –

**द्रुमा धावन्तीव द्रुतरथगतिक्षीणविषया**

**नदीवोद्द्वृत्ताम्बुर्निपतति मही नेमिविवरे।**

**अरव्यक्तिर्नष्टा स्थितमिव जवाच्चक्रवलयं**

**रजश्चाश्वोद्भूतं पतति पुरतो नानुपतति।।**

(प्रतिमा – 3.2)

प्रतिमानाटके कविः भासः भिन्नप्रसङ्गेषु रथस्य प्रयोगं कृतवान् –

**शून्यः प्राप्तो यदि रथो भग्नो मम मनोरथः।**

**नूनं दशरथं नेतुं कालेन प्रेषितो रथः।।**

(प्रतिमा – 2.11)

अर्थात् रामचन्द्रस्य वनवासं गमनपश्चात् राजा दशरथः तस्य मन्त्रिसुमन्त्रद्वारा प्रेषिते एकस्मिन् रथे रामस्य आगमनस्य आशा कृतवान्। परन्तु यदि रथे रामः न स्यात् तर्हि तस्य मनोरथः भग्नः जायते। एवं भवति चेत् अयं रथः दशरथं नेतुं यमराजेन प्रेषित इति मन्तव्यम्।

महाकविः कालिदासोऽपि ‘रघुवंशम्’ इति महाकाव्ये राज्ञः दिलीपस्य रथस्य एवञ्च ‘अभिज्ञानशाकुन्तलम्’ इति नाटके राज्ञः दुष्यन्तस्य रथस्य गतिविधिं वर्णितवान् –

**यदालोके सूक्ष्मं व्रजति सहसा तद्विपुलतां**

**यदन्तर्विच्छिन्नं भवति कृतसन्धानमिव तत्।**

**प्रकृत्या यद्वक्रं तदपि समरेखं नयनयो-**

**र्न मे दूरे किञ्चित्क्षणमपि न पार्श्वे रथजवात्।।**

(अभिज्ञानशाकुन्तलम् –1.9)

अर्थात् रथवेगातिशयवशात् यद्वस्तुः दूरतः सूक्ष्मं दृष्टं तदेव समीपमागते स्थूलं दृश्यते। यत्र मध्ये व्यवहितं तदेव कृतसन्धानं दृश्यते। एवं स्वभावतो वक्रं तदपि दूरतः समरेखं दृश्यते। तस्मात् किमपि न मम दूरे, नापि समीपे क्षणमप्यवतिष्ठते, यदिदानीं दूरे तदेव क्षणन्तरेण समीपे, यच्चेदानीं समीपे तदेव निमेषमात्रेण दूरे भवतीत्यर्थः।

भासकालिदासयोः परवर्तिसमये प्रायः सर्वे संस्कृतनाट्यकाराः तेषां नाटकेषु प्रथारूपेण एव रथस्य वर्णनां कृतवन्तः। अष्टादशशतके केरलप्रदेशस्य एकः राजा तथा कविः आश्विना रामाभार्यां श्रीकृष्णस्य रथस्य गतविर्णनां कृत्वा उक्तवान् यत् –

दारूकः – (रथवेगं रूपयित्वा) आयुष्मान् पश्य पश्य –

**पादस्पर्शं जुगुप्सयेव सहसा गामुत्सृजन्तः खुरैः**

**जेतुं पत्ररथेशमारुतमनोवेगान्प्रवृत्ता इव।**

**मुक्तालीनखलीनकान्तिपटलैः ट्टहासा इव**

**प्रेङ्खत्किङ्किणिका वहन्ति हि नभोवीथ्येव रथ्या रथम्।।**

(रुक्मिनीपरिणयम् - 1.11)

संस्कृतशतककाव्येषु अन्यतममस्ति सूर्यशतकम्। ग्रन्थेऽस्मिन् कविः मयूरभट्टः सूर्यदेवस्य स्तुतिमूलकानि शतश्लोकानि लिखितवन्तः। तेषु द्विषष्टिश्लोकतः द्विसप्ततिश्लोकपर्यन्तम् (62-72) एतेषु एकादशश्लोकेषु सूर्यदेवस्य रथविषये मनोरमवर्णना अस्ति। यथा -

**पीनोरः प्रेरिताभ्रैश्चरमखुरपुटाग्रस्थितैः प्रातरद्रा**

**वादीर्घाङ्गैरुदस्तो हरिभिरपगतासङ्गनिः शब्दचक्रः।**

**उत्तानानूरुमूर्धावनतिहठभवद्विप्रतिपप्रणामः**

**प्राह्णे श्रेयो विधत्तां सवितुरवतरन् व्योमवीथीं रथो वः।।**

(सूर्यशतकम् - 62)

शिल्पशास्त्रेऽपि सौन्दर्यविधाने रथस्य वर्णना दरीदृश्यते। यथा ओडिशायां भुवनेश्वरनगरस्य प्रान्ते सूर्यदेवस्य "कोनार्क" इति मन्दिरम्।

छन्दशास्त्रेऽपि 'रथोद्धता' इति नाम्ना सुप्रसिद्धः एकः छन्दोऽस्ति। तस्य छन्दसः लक्षणं यथा - **"रात् परैर्नरलगै रथोद्धता" (छन्दोमञ्जरी - पृ. 67)** इति।

उत्सवादिष्वपि रथस्य योगदानं परिदृश्यते। यथा - रथसप्तमी, रथयात्रा इत्यादयः। 'रथसप्तमी' इति सूर्यदेवसम्बन्धितः उत्सवः माघमासस्य सप्तमदिनाङ्के पूर्णिमातिथौ पालितो भवति। ओडिशाप्रदेशस्य पूरीनगरस्य जगन्नाथमन्दिरे भगवतः जगन्नाथस्य, वलरामस्य, सुभद्रायाश्च रथयात्रोत्सवः सुप्रचलितः सुप्रसिद्धश्चास्ति इति।

रथस्य व्यवहारः न केवलं वैदिकसाहित्ये, लौकिकसाहित्ये अपि बहुषु स्थलेषु परिलक्षते। केवलं यानरूपेण न उपमारूपेणापि कुत्रचित् शरीररूपेण क्वचिच्च जगद्रूपेण रथस्य व्यवहारः दृश्यते, इतोऽपि बहुत्र भिन्नभिन्नप्रसङ्गेषु रथशब्दस्य प्रयोगः परिदृश्यते। इत्थं ज्ञायते यत् संस्कृतसाहित्ये रथशब्दस्य महत्त्वपूर्णस्थानमासीत्।

**सन्दर्भग्रन्थसूची –**


1. ऋग्वेद - डा. गङ्गा सहाय शर्मा - संस्कृत साहित्य प्रकाशन, नई दिल्ली - 110001.
2. यजुर्वेद (सम्पूर्ण हिन्दी भाष्य, शब्दार्थ सहित) - स्वामी श्रीमद्दयानन्द सरस्वती, प्रकाशक -
1. संस्कार प्रकासन, 4408, नई सडक, दिल्ली-111006
2. अथर्ववेद - डा. गङ्गा सहाय शर्मा - संस्कृत साहित्य प्रकाशन, नई दिल्ली - 110001.
3. उपनिषद् (ईशादि नौ उपनिशद्) - गीताप्रेस, गोरक्षपुर - 273005 (INDIA).
4. निरुक्तम् (आचार्य दुर्गकृत ऋज्वर्थाख्यावृत्तिसमेतम्) - प्रो. ज्ञानप्रकाश शास्त्री, परिमल
5. पब्लिकेशन्स, दिल्ली-2004.

6. अमरकोष वा अमरार्थ चन्द्रिका – श्रीमद्गुरुनाथ विद्यानिधि–भट्टाचार्य, प्रकाशक –
7. श्री देवाशिस भट्टाचार्य्य, संस्कृत पुस्तक भाण्डार, 38 विधान सरणी, कोलकाता – 700006.
8. श्रीमद्भगवद्गीता – गीताप्रेस, गोरक्षपुर – 273005 (INDIA).
9. प्रतिमानाटकम् – SHIVAJAM MAHADEO PARANJAPE, Oriental Book
10. Agency,15,Sukrawar Peth, Poona city.
11. अभिज्ञानशकुन्तलम्, सम्पादक – श्री सत्यनारायण चक्रवर्ती, प्रकाशक – संस्कृत पुस्तक
12. भाण्डार, 38 विधान सरणी,कोलकाता – 700006.
13. सूर्यशतकम् – पण्डित श्रीमहेश्वर आचार्य शर्मा, चौखम्बा संस्कृत सीरीज ऑफिस, वाराणसी- 221001.
14. छन्दोमञ्जरी – डा. अनिल चन्द्र वसु, संस्कृत बुक डिपो, 28/1 विधान सरणी, कोलकाता – 700006.